 ISSN 976-8645

# प्रयोगमुखस्य कारकसमीक्षा।

सदानन्दझा[329]

व्याकरणशास्त्रस्य मूर्द्धन्यतमोऽयं प्रयोगमुख नामकोग्रन्थः पण्डितानां मध्ये प्रसिद्धः। प्रणेताचास्य महावैयाकरणो धर्मकीर्तिः यत् पूर्वं वैदिकः पश्चाद बौद्धः संजातः।

विज्ञात सकलज्ञेयमुत्तीर्ण भवसागरम्

प्रणम्य सुगतं सम्यगुच्यते शब्दशासनम्। (2)

रूपावतारे स्वयमेवोक्तमुपरिलिखित पद्यम्। अस्यस्थितिकालः द्वादशशतब्धत उत्तरार्ध इति स्वीक्रियते। प्रयोगमुखकर्त्रा स्वकीय रूपावतारग्रन्थे पदमंजरीकारस्य हरदत्रस्य चर्चा कृता। 2

दुर्घटवृतौ शरणदेवेन हेमचन्द्रेण च धर्मकीर्तेः स्मरणं कृतम3। प्रयोगमुखस्य शैली रूपावतारादतिशय साम्यं बिभर्ति। अनेनापि अनुमीयते प्रयोगमुख रूपावतार ग्रन्थद्वयस्य रचयिता धर्मकीर्तिरेव। परमोपादेयत्वात् पण्डितानां मनोविनोदायस्वान्तः सुखाय गवेषकाणां चोपकाराय मया प्रयोगमुखस्थ कारक समीक्षानामक निबन्धः प्रस्तूयते।

योन्यथा विहितं प्रयोगं ज्ञातुमिच्छन्ति पुरुषेणादितः प्रथमतः कारकं ज्ञेयं ज्ञातव्यम्। प्रयुज्यत इति प्रयोगः कीदृशं कारकमिति विषये स्वयमेव धर्मकीर्तिना संज्ञया षडविधं नाम्ना षटप्रकारक मित्यर्थ इतिउद्धृतः। कर्तृकर्मकरणसम्प्रदानापादानाधिकरणानि। यद्यपि सकल शाब्दिकवदेव षष्ठयाः कारणत्वंनासित इति वदता धर्मकीर्तिना त्रयोविंशति संख्यकं संकलनया कारक वेदस्वरूपमुररीकृतम।(4)

यथा तत्र पञ्चविधः कर्त्ता कर्मसप्तविधं भवेतं करणं द्विविधं चैव सम्प्रदानं त्रिधामतम्। द्विविधमपादानं चतुर्विमधिकरणं चेति। (5)

अत्र कारकमिति जाति पक्षमाश्रित्य एकवचन निर्देशकृतः।

**कर्ता**

कर्तुर्विवेचनप्रसंगे कथयति प्रयोगमुखे धर्मकीर्तिः तत्र पंचविधः कर्त्राकतमः (1) स्वतंत्रकर्त्रा (2) हेतुकर्त्रा (3) कर्मकर्त्रा अभिहितकर्त्रा अनभिहितकर्त्रा। (1) स्वतंत्रकर्तुरुदाहरणं यथा पुण्यं करोति श्राद्धः। श्रद्धायस्यस्ति यस्मिन् वा विद्यते सश्राद्धः प्रज्ञाश्रद्धार्चावृतिभ्योऽण इत्यण प्रत्ययः। णकरोवृद्धयर्थः यस्येतिचेत्यकार लोपः प्रथमैकवचनेसु विसर्गा। स्वतंत्रः कर्तेति कर्तृसंज्ञां तेन कर्तरि लकारो विहितः 9 कर्तुरभि् कर्तरि प्रथमा भवति। क्रियासिद्धौ यः परोपेक्षां न कुरुते सः स्वतंत्रः कर्तेच्यिते अत्र धर्मकीर्तिः कारिकामिमां प्रस्तौति प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः अप्रयुक्तः प्रयुक्तो वा सकर्त्रानम कारकम्। हेतुकर्तुद्धाहरणं प्रस्तौति धर्मकीर्तिः। यथा हितं लभन्ते विनीताः तान् विनीतान् हितं लभमानान् योऽन्यो धीरः प्रयुङ्क्ते सदितं सम्भवति लम्भयति विनीतान् धीरः। लभेश्चेति वृद्धेदपवादो नुम् भवति तत्प्रयोजको हेतुश्चेति हेतुमति चेति णिच् चकारात् कर्तृ संज्ञा च। फलसाधनयोग्यः पदार्थो लोके हेतुरुच्यते। तस्यग्रहणमपि नास्ति स्वतंत्रत्वात्। तस्मात् स्वतंत्रस्य कर्तुः प्रयोजको लोके हेतुरुच्यते।

(3) कर्मकर्तुरुदाहरणं यथा – कर्मचासौकर्त्रा चेति कर्मधारयसमासः। कर्मभूत्वा कर्त्रा भवति। स्वयमेव छिद्यते वृक्षः अस्यायमर्थः – यदि कश्चिद् वृक्षं छिनति तदा वृक्षः कर्म भवति। सच छेद क्रियामानुकूल्यं भजमानः स्वयमेवात्मानं छिनत्ति इत्यर्थः एतेन कर्मकर्त्रा भवति कर्मवत् कर्मणातुल्यः क्रियः इति कर्मवद्भावः। अतिदेशोऽयम्। कर्मणा तुल्यक्रियः कर्माकर्मवद् भवति। कर्माश्रयापि प्रतिपद्यन्ते आत्मनेपदंयक् च।

---

[329] व्याकरणविभागाध्यक्षः, ज. ना. ब्र.

अनभिहित कर्तु यथा – साधवः परार्थमुत्पादयति गांददाति धार्मिकः स्वरवत्वनिवृतिपूर्वक परस्वत्वोत्पनुकूलव्यापारे दाधातोरर्थः।

अनभिहितकर्तुरुदाहरणं यथा नाभिहितमनभिहितम् नमिति समासः तस्मान्नुऽचीतिनुट् साधुभिः परार्थ5 सम्पालने। अनभिहिते कर्तृकरणयोस्तृतीया इति तृतीया विभक्तिर्भवति अल तिङा कर्मणे ऽभिधानं न कर्त्रुरिति वक्ष्यते।

**कर्मविचारः**

कर्मविवेचन प्रसंगे प्रयोगमुखकाएः सप्तविधंमन्यन्ते। ईप्सितानीप्सित ईप्सीतानीप्सिताकथित कर्तृकर्माभिहित कर्मानभहितं कर्मापि सप्तप्रकारापि।

(1) ईप्सितकर्म – ओदनंभुङ्कते ब्राह्मणः। अत्र कर्त्तुरीप्सिततमं कर्मेतिकर्मसंज्ञया। कर्मणि द्वितीयेति द्वितीया विभक्तिर्भवति।

(2) अनीप्सित कर्म – विषं भक्षयतिक्रुद्धः – तथायुक्तं चानीप्सितम् इति कर्मसंज्ञा कर्मणिद्वितीयेति द्वितीया विभक्तिर्भवति।

(3) ईप्सीतानीप्सितं कर्मयथा – सरजपायसं भक्षयति बालकः। पायसं भक्षयन् तत्रपतितं रजोऽप्यभ्यवहरति बालक इत्यर्थः। अत्र अभ्यवहारो भक्षणम्।

(4) अकथितं कर्म यथा – गांदोग्धि दुग्धं गोपालः – अत्रपतञ्जलेर्वचनं प्रस्तौति यथा दुहियाचिरुधि प्रच्छिभिक्षिचिञामुपयोग निमित्तमपूर्वविधौ बुविशासि गुणेन च यत्सचते तद कीर्तितमाचरितं कविना। अस्यायमर्थः – एषांधातूनामुपयोगनिमित्तं यत्कारकं तदकीर्तिनभकथितं कविना ग्रन्थकारेण आचरितम्। अपूर्व विधौ पूर्वेविध्यभावेसति अपाक्षनादि विशेष संज्ञा रहितस्य काटकस्य कर्मसंज्ञा अकथितं चेति व्यनेन। अपासवादि विशेष संज्ञारहितस्य कारकस्य कर्मसंज्ञा. कथितं तदकीर्तितमित्यर्थः। बुविश्च शाशिश्च ब्रुवीशासी तर्योगुणः ब्रुविशसिगुणः ब्रुविशासिगुणेन प्रधान कर्मणा यत् संचते यत् सम्बद्धयते तदपि कर्म कविना अकीर्तितम् अकथितम् आचरितम्।

(5) कर्तृकर्म यथा – ग्रामंगच्छति पथिकः तमन्यः प्रयुङ्क्ते गच्छगच्छेति तदा हेतुमतिचेति णिच् गमयति ग्रामं पथिकं देवदत्तः।

(6) अभिहितं कर्म – कटः क्रियते देवदत्तेन।

(7) अनभिहितंकर्म कटं करोतिना – अत्र भर्तृहरिणा वाक्यपदीये ईप्सितकर्मणः त्रैविध्यं ........क्रियते निर्वर्त्य विकार्य प्राप्यभेदेन।

कात्यायनेन निर्वर्त्य, विकार्ययोश्चचक्तिानतु प्राप्यस्य।

ईप्सितातिरिक्तानामपि चत्वारः भेदाः भर्तृहरिणा स्वीकृता।

**करणम्**

करणविवेचन प्रसंगेप्रयोगमुखकारः द्वैविध्यमुररीकरोति बाह्यमाभ्यतश्चेति।

(1) यच्छरीरा वयवातिरिक्तं तद्बाह्यम्। यथा परशुना काष्ठं च्छिनति कर्मकारः।

(2) यच्छरीरा वयवाश्रितं तदाभ्यन्तरम्। यथा चक्षुषा रूपं गृह्णाति कामुकः साधकतमं करणम् क्रियासिद्धौ यत् प्रकृष्टोपकारकं तत कारकं करण. भवति कर्मणि सति कर्तरि च सति येन विनाकार्य न सम्पद्यते हि भवति।

अत्र वासुदेव दीक्षिताः स्वकीय बालमनोरमायां सिद्धान्तकौमुदी व्याख्यायां कथितवन्तः यद् व्यापारानन्तरं क्रियानिष्पत्तिः स्तत् प्रकृष्टम् कर्तृव्यापाराधीनयद् व्यापारा व्यवहिता क्रियानिष्पत्तिः तत्तस्यां करणम्।

**सम्प्रदानम्**

सम्प्रदानविचारप्रसंगे प्रयोगमुखे धर्मकीर्तिः त्रैविध्यं स्वीकरोति।

प्रेरकम् आनुमंत्रिकमनिराकर्तृकम।

प्रेरकंयथा – ब्राह्मणायगां ददाति गृहस्थः। सर्हि गृहस्थमासाद्य मह्यं देहीति प्रेरयति अतः सम्प्रदान प्रेरकंमुच्यते।

(3) आनुरीमिकं अतियये फलमूलकं ददाति तपोधनः सह्यतिथिः फलंमूलंच दातुं नतं प्रेरयति तेन च दीयमानमनुमन्यते तस्मादानु मंत्रिकमुच्यते।

(4) अविराकर्तृकंयथा चैत्याय पुपांददात्युपासकः। सदि चैत्यभट्टारको देवः पुष्पं दातुं न तं प्रेरयति। तेन च दीयमानं न निराकरोति। तस्मादनिराकर्तृ कमुच्यते। कर्मणायमभिप्रैति ससम्प्रदानम्। कर्मणा करण यमर्थमभिप्रैति संयोगगयति, अभिमुखेन सम्बध्नाति यत् कारकं सम्प्रदान संज्ञकं स्यात्। चतुर्थी सम्प्रदाने चतुर्थी विभक्ति भवति।

(5) अपादावादि विशेष संज्ञारहितस्य कारकस्य कर्मसंज्ञा कथितं तदकीर्तितमित्यर्थः। बुविश्च शाशिश्च ब्रुवीशासी तयोर्गुणः बुंविशासिगुणः ब्रुविशासिगुणेन प्रधानकर्मणा यत् संचते यत् सम्बद्धयते तदपि कर्म कविना अकीर्तितम् अकथितम् आचरितम्।

(6) कर्तृकर्मा यथा – ग्रामं गच्छति पथिकः तमन्यः प्रयुङ्क्ते गच्छ गच्छेति तदा हेतुमतिचेति णिच् गमयति ग्रामं पथिकं देवदत्तः।

(7) अभिदितंकर्म – कटः क्रियते देवदत्तेन।

(8) अनभिहितंकर्म कटं करोतिण –

अनभर्तृहरिणा वाक्यपदीये ईप्सित कर्मणः त्रैविध्यं मुररीक्रियते निर्वर्त्य विकार्य प्राप्यभेदेन।

कात्यायनेन निर्वर्त्य, विकार्ययोश्चचकृितानतुं प्राप्यस्य।

ईप्सितातिरिक्तानामपि चत्वारः भेदाः भर्तृहरिणा स्वीकृताः

**करणम्**

करणविवेचन प्रसंगेप्रयोगमुखकारः द्वैविध्यमुररीकरोति बाह्यमाभ्यतश्चेति।

(1) यच्छरीरा वयवातिरिक्तं तद् बाह्यम्। यथा परशुना काष्ठं च्छिनतिकर्मकारः।

(2) यच्छरीरावयवाश्रितं तददाभ्यन्तरम् **यथा** चक्षुषा रूपं गृह्णाति कामुकः साधकतमं करणम् क्रियसिद्धौ यत् प्रकृष्टोपकारकं तत कारकं करणकतं भवति कर्मणि सति कर्तरि चच सति यनविनाकार्य न सम्पद्यते।

यस्मै सम्यक् प्रदीयते तत् सम्प्रदान संज्ञं भवति तेनेहन भवति रजकस्य वस्त्रंददाति। दानमभिप्रेतम अतआह स्वस्वत्वनिवृत्ति परस्वत्वोत्पतिर्दानम् तच्चेह नास्ति तेन सम्बन्धमात्रे षष्ठयेव भवति किन्तु प्रयोग मुखकार मतमत्र न समीचीनं प्रतिभाति यतोहि पतंजलि वचन विरोधत्वात् यउदात्ते कर्तव्येऽनुदात्तं करोति तस्मै शिष्याय चपेटां ददाति। एवमेव नागेशभट्टेनापि परमलघुमंजूषायांवृत्तिकारमतमुपेक्ष्य पतंजलिमतमेव समर्पितम्।

अतएव रजकाय वस्त्रं ददातीत्यत्र रजकरणे शब्दस्य चतुर्थ्येव नतु षष्ठी।

अशेषशास्त्र निष्णातेन महावैयाकरण नागेश भट्टेन परमलघु मंजूषायामेतन्मतं खण्डितम् – यथा यत्तुवृत्तिकाराः सम्यक् प्रदीयते यस्मै तत्सम्प्रदाय मित्यन्वयर्थक संज्ञेयम्। तथा च गोनिष्ठस्वस्वत्व निवृत्ति समानाधिकरण परस्वत्वेत्पत्यनुकूल व्यापार रूपक्रियोद्देश्यस्य ब्राह्मणादेरेव सम्प्रदानत्वम्। पुनर्ग्रहणाय रजकस्य वस्त्रदाने रजकस्य वस्त्रंददाति इति सम्बन्धसामान्ये षष्ठयेवेत्याहुः।। स्तन्न। खण्डिकोपाध्यायः शिष्याय चपेटां ददाति इति भाष्यविरोधात् कर्मणायमभिप्रैति इति सूत्रव्याख्यावसरे भाष्यकृता अन्वर्थसंज्ञाया अस्वीकाराच्च। अतएव तदाचक्ष्वासुरेन्द्राय सचयुक्तं करोति यत् इति सप्तशती श्लोकः संगच्छते। तस्माद् रजकाय वस्त्रं ददाति इत्यादि भवत्येव। अत्र आधीनीकरणऽर्थे ददातिः चपेटां ददाति त्यत्र व्यसनेऽर्थे इति।

अत्र कर्मणा यमभिप्रैति ससम्प्रदानम्। कर्मणा कारणभूतेन कर्त्रा यमभिप्रैति तत्कारकं सम्प्रदानं संज्ञं भवति। अन्वर्थ संज्ञाविज्ञानात् ददाति कर्मणेति कर्तव्यम् विज्ञायते। उपाध्यायस्य गांददाति। माणवकाभिक्षां ददाति। क्रियाग्रहणमपि कर्तव्यम्।

क्रियया यमभिप्रैति स सम्प्रदानम्। श्राद्धाय निगल्हते। युद्धाय सन्नह्यति। पत्येशेते इति काशिकावृत्तौ तदर्थः। भाषावृतौ तुकर्मणा करणभूतेन यमभि सम्बध्नाति तत्कारकं सम्प्रदानं स्यात्। ब्राह्मणाय गं ददातिधार्मिकः। गुरवेधनं निर्यातयतिरुष्टः। खादिकोपाध्याय यः शिष्याय कर्ण चपेटामदात। शस्त्रवे भयंददाति दनतः पृष्ठं ददाति9 अभिप्रैत्यर्थस्याविवक्षिततत्वा यथा सममब्राह्मणे दानमिति। इह प्रार्थनाध्यवसानादि क्रियाभिः कर्तुरीप्सिततमत्वात् क्रियापि कर्म भवति तत्क्रियया यदभि सम्बध्यते तत्सम्प्रदाने सूत्रेणैव युद्धाय सन्नह्यते। पत्येशेते। निवेद्यतां सुग्रीवाय। प्रणम्य शास्त्रे सुगतायिने इति अस्तिचात्र श्लोकः

**अनिराकरणात् कर्त्तुस्त्यागाङ्गं कर्मणेप्सितम्**

**प्रेरणानमतिभ्यां वा लभते सम्प्रदानताम्।**

त्यागोदानं त्यागस्यांगं शेषभूतं कर्मणा गवादिनेप्सित याप्तुमिष्टं सम्प्रदानतां लभते अनिराकरणाद्धाएवमस्त्वित्यनुमानाद्वेति श्लोकार्थः पदमञ्जर्यां स्पष्टम्। भष्यकृतसु स्त्वत्रनच स्वस्वत्वनिवृत्तिपूर्वक परस्वत्वोपपादान मात्रमेण मन्यते। तेन खण्डिकोपाध्यायः शिष्याय चपेटी ददाति इति प्रयुक्तक्ति। नचते क्रियाग्रहणमपि कर्तव्यमिति वार्तिकमेव पठन्ति। तेहि क्रियापिकृत्रिम कर्म 1.4.32 इति कर्मणा। इत्येतस्यैव क्रियया इत्यर्थमपि आमनन्ति। भाष्यकृत इय प्रस्तुत...थकृदपि नदिकर्मणाइत्यस्य ददातेरेव कर्मणेति स्वीकुर्वन्ति। नचसंज्ञामिमामन्वर्थां। मन्यन्ति। सदि सम्प्रदान मित्येतस्य न सम्प्रदानमित्यर्थं गृहणा त्यपितु तस्याधीनकरणन्यसनाधर्थानपि स्वीकरोति। सदि रजकायवाचं ददातीति प्रयोगमपि साधुमन्यते। परमलघुमंजूषा व्याख्यायां माचार्य लोकमणिटहालभागेन विस्तृतमतंसमर्थितमप्रतिपादितच।

विभिन्नशाब्दिकानां पतंजलिनागेश प्रभृतीनां मतं प्रयोगमुख्य विरुद्धम्।

**अपादानम्**

अपादान विवेचनावसरे प्रयोगमुखे द्विविधमपादानं स्वीकरोति धर्मकीर्तिः चलं – धावतोऽश्ववाहकः अचलंयथा – ग्रामादाभच्छति पथिकः।

अत्र वाक्यपदीय कारस्य भर्तृहरेः कारिकामुपस्थापयमासधर्मकीर्तिः।

अपाये यदुदासीनं चले वा यदि वाऽचलम् ध्रुवमेव तदावेशात् तदपादानमुच्यते।

पततो ध्रुव एवाऽसौ यस्मादश्वात् पतत्यसौ तस्याप्यश्वस्य पतने कुडयादि ध्रुवमेष्यते।

मेषान्तर क्रियापेक्षमवधित्वं पृथक् पृथक् अपायेसाध्ये यद्ध्रुवभवधिभूतं तत् कारके मपादान संज्ञं भवतीत्यर्थः पतिता इति द्वितीया श्रितातीतपतित शवात्यस्तप्राप्तापन्नैः इति निर्देशात् इट् अन्यथा यस्यविभावेतीट् निषेधः स्यात्।

**अधिकरणम्**

अधिकरण विवेचनक्रमे प्रयोगमुखे चतुर्विधमधिकरणं स्वीकरोति धर्माकीर्तिः

अभिव्यापकमौपश्लेषिकं वैषयिकं सामीप्यं चेति-

(1) अभिव्यापकं यथा तिलेषु तैलमात्ति, तिलमभिव्याप्य तैलमस्तीत्यर्थः।

(2) कौपश्लेषि कटे अगत्रे द्विगः कटमुपश्लिष्य अस्त्र इत्यर्थः एकदेशमुपश्लिषत्युप श्लेषः देशाश्रयत्वादेवौपश्लेषिकमुच्यते।

(3) वैषियिकं यथा – वनेतिष्ठन्ति शार्दूलाः वनविषयीकाय तिष्ठन्तीत्यर्थः।

(4) सामीप्यं यथाा – गंगायांघोषः प्रतिवसति गंगासमीपे घोषः प्रतिवसतीत्यर्थः।

आधारोऽधिकरणम्, इत्यधिकरणसंज्ञा, अनभिहित इत्यधिकृत्य सप्तम्यधिकरणे चेति सप्तमी विभक्ति भवति।

इत्थं प्रकारेण प्रयोग कारक समीक्षा विहिता।

------------------------------------------------------------

**ग्रन्थ निर्देशाः -**


1. रूपावतारे धर्मकीर्तिः प्रारंभे वाणीं स्तौति।
2. पदमंगरीकारः हरदत्तः
3. प्रयोगपल्लवः भवनाथकृत डॉ. शशिनाथ झा सम्पादितः -
4. रूपावतारः
5. प्रयोगमुखग्रन्थे पृ. 151
6. परमलघुमंजूषाव्याख्यायाम्, पृ.. 274
   डॉ. लोकमणि दहालः, चौखम्बा सुरभारती प्रकाशनम्
7. तत्रैव पृ. 275
8. भाषावृत्तिः
9. पदमंजरी
10. कर्मणायमभिप्रैतिससम्प्रदानम् पाणिनीय सूत्रम 1.4.32
11. तत्रैव महाभास्यम्
12. दुर्गासप्तशती पंचमाध्यायः
13. वाक्यपदीयमृ - श्लोक संख्या